# শ্রীলক্ষ্মী নরসিংহ সুপ্রভাতস্তোত্রম্ (যাদগিরি)

{॥ শ্রীলক্ষ্মী নরসিংহ সুপ্রভাতস্তোত্রম্ (যাদগিরি) ॥}

। শ্রী যাদগিরি লক্ষ্মীনৃসিংহ সুপ্রভাতম্

শ্রী বঙ্গীপুরম্ নরসিংহাচার্যরচিত ।

কৌসল্যা সুপ্রজা রাম পূর্বা সংধ্যা প্রবর্ততে ।

উত্তিষ্ঠ নরশার্দূল! কর্তব্যং দৈবমাহ্নিকম্ ॥ ১॥

উত্তিষ্ঠোত্তিষ্ঠ গোবিংদ উত্তিষ্ঠ গরুডধ্বজ ।

উত্তিষ্ঠ কমলাকান্ত ত্রৈলোক্যং মঙ্গলꣳং কুরু ॥ ২॥

যাদাদ্রিনাথশুভমন্দিরকল্পবল্লি

পদ্মালযে জননি পদ্মভবাদিবন্দ্যে ।

ভক্তার্তিভঞ্জনি দযামযদিব্যরূপে

লক্ষ্মীনৃসিংহদযিতে তব সুপ্রভাতম্ ॥ ৩॥

জ্বালানৃসিংহ করুণামষ দিব্যমূর্তে

যোগাভিনন্দন নৃসিংহ দযাসমুদ্র! ।

লক্ষ্মীনৃসিংহ শরণাগতপারিজাত

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ৪॥

শ্রীরঙ্গবেঙ্কটমহীধরহস্তিশৈল

শ্রী যাদবাদ্রিমুখসত্ত্বনিকেতনানি ।
স্থানানি তেকিল বদন্তি পরাবরজ্ঞাঃ
যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ৫॥

ব্রহ্মাদযস্সুরবর মুনিপুঙ্গবাশ্চ
ত্বাং সেবিতুং বিবিধমঙ্গলবস্তুহস্তাঃ ।
দ্বারে বসন্তি নরসিংহ ভবাব্ধিপোত
যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ৬॥

প্রহ্লাদ নারদ পরাশর পুণ্ডরীক
ব্যাসাদিভক্তরসিকা ভবদীযসেবাম্ ।
বাঞ্ছন্ত্যনন্যহৃদযা করুণাসমুদ্র
যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ৭॥

ত্বদ্দাস্যভোগরসিকাশ্শঠজিন্মুখার্যাঃ
রামানুজাদিমহনীযগুরুপ্রধানাঃ ।
সেবার্থ মত্র ভবদীযগৃহাঙ্গণস্থাঃ
যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ৮॥

ভক্তা স্ত্বদীযপদপঙ্কজসক্তচিত্তাঃ
কাল্যং বিধায তবকন্দর মন্দিরাগ্রে ।
ত্বদ্দর্শনোৎসুকতযা নিবিডং শ্রযন্তে

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ৯॥

দিব্যাবতারদশকে নরসিংহ তে তু
দিব্যাবতারমহিমা নহি দেবগম্যঃ ।
প্রহ্লাদদানবশিশোঃকিল ভক্তিগম্যঃ
যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ১০॥

শ্রীযাদবাদ্রিশিখরে ত্বমহোবিলেঽপি
সিংহাচলে চ শুভমঙ্গলশৈলরাজে ।
বেদাচলাদি গিরি মূর্ধসু সুস্থিতোসি
যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ১১॥

কাম্যার্থিনো বরদকল্পক কল্পকং ত্বাং
সেবার্থিনঃ স্সুজনসেব্যপদদ্বযং ত্বাম্ ।
ভক্ত্যা বিনম্র শিরসা প্রণমন্তি সর্বে
যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ১২॥

ত্বন্নামমন্ত্রপঠনেন লুঠন্তি পাপাঃ
ত্বন্নামমন্ত্রপঠনেন লুঠন্তি দৈত্যাঃ ।
ত্বন্নামমন্ত্রপঠনেন লুঠন্তিরোগাঃ
যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ১৩॥

লক্ষ্মীনৃসিংহ! জগদীশ! সুরেশ! বিষ্ণো

জিষ্ণো! জনার্দন! পরাৎপর বিশ্বরূপ ।

বিশ্বপ্রভাতকরণায কৃতাবতার

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ১৪॥

ত্বন্নামমন্ত্র পঠনংকিলসুপ্রভাতং

অস্মাকমস্তু তবচাস্তু চ সুপ্রভাতম্ ।

অস্মৎসমুদ্ধরণমেব বিচিত্রগাধ

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ১৫॥

ত্বত্ পূজকা পরিরূঢা পরিচারকাশ্চ

নিত্যার্চনায বিধিবদ্বিহিত স্বকৃত্যাঃ ।

যত্তস্ত্বদীয শুভগহ্বর মন্দিরাগ্রে

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ১৬॥

প্রাভাতকীমুপচিতিম্ পরিকল্পযন্তঃ

কুণ্ডাশ্চ পূর্ণজলকুম্ভমুপাহরন্তঃ ।

শ্রীবৈষ্ণবাঃ সমুপযান্তিহরে! নৃসিংহ

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ১৭॥

সূর্যোঽভ্যুদেতি বিকসন্তি সরোরুহাণি

নীলোৎপলানি হি ভবন্তি নিমীলিতানি ।

প্রাগ্দিঙ্মুখেরুণগভস্তিগণোঽভ্যুদেতি

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ১৮॥

মন্দানিলস্সুর নদীকমলোদরেশু

মন্দংবিগাহ্য শুভসৌরভ মাদধানঃ ।

হর্ষপ্রকর্ষমুপযাতি চ সেবিতুং ত্বাং

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ১৯॥

তারাগণোবিযতি মজ্জতি সুপ্রভাতে

সূর্যেণসাকমবলোকযিতুং ত্বদীযম্ ।

শ্রীসুপ্রভাতমবভাসিত সর্বলোকং

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ২০॥

পক্ষিস্বনাশ্চপরিতঃপরিসম্পতন্তি

কূজন্তিকোকিলগণাঃকলকংঠরাবৈঃ ।

বাচা বিশুদ্ধকলযানুবদন্তিকীরাঃ

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ২১॥

পল্লীষু বল্লবজনাঃস্বগৃহাঙ্গণেষু

ধেনূর্দুহন্তি বিনিভান্তি বিশেষদৃষ্ট্যা ।

গোপালবাল ইব ভক্তহৃদম্বুজেষু

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ২২॥

গাঢাংধকারপটলম্ গগনংজহাতি

মোহান্ধকার ইব সন্মনুজম্ সমস্তম্ ।

রাগোবিরাগ ইব সংবিশতি প্রকামং

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ২৩॥

নিদ্রাজহাতি হি জনান্ সুমুনিং যধাবত্

প্রজ্ঞাপ্যুদেতি হি জনেষু মুনৌযধাবত্ ।

সক্তির্জনেষু হি যথা চ মুনৌবিরক্তিঃ

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ২৪॥

ফুল্লানিপঙ্কজবনানি বিশুদ্ধসত্ত্ব

ফুল্লানি সজ্জনমনঃকমলানি যদ্বত্ ।

ভাশ্শুদ্ধসত্ত্বমিব ভাতি বিদিক্ষু দিক্ষু

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ২৫॥

ব্রহ্মাস্বযংসুরগণৈস্সহলোকপালৈঃ

ধামপ্রবিশ্য তব মণ্ডপগোপুরাঢ্যম্ ।

পঞ্চাঙ্গশুদ্ধিমভিবর্ণযতি ত্বদীযাং

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ২৬॥

বিখ্যাতবৈদ্যজন বঞ্চকরোগজাল

বিখ্যাতবৈদ্য ইতি রোগনিপীডিতাস্ত্বাম্ ।

নিশ্চিত্যধাম তব দূরত আপতন্তি

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ২৭॥

ভূতগ্রহাদি বলবত্তর তাপযুক্তাঃ

বাণাবতীমুখ মহোগ্রপিশাচ বিদ্ধাঃ ।

স্নাতাঃপ্রদক্ষিণবিধা বুপযান্তিনাথ

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ২৮॥

সন্তানহীন বনিতাস্সরসি ত্বদীযে

স্নাত্বাজলার্দ্রবসনাস্তব দর্শনায ।

আযান্তিসন্ততিবরপ্রদ দেবদেব

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ২৯॥

যদ্দুষ্ট সংহরণমুত্তমলোকরক্ষা

দীক্ষাং ব্যনক্তি তবরূপ মহোনৃসিংহ ।

তচ্চাত্র যাদগিরিমূর্থনিসংবিভাতি

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ৩০॥

প্রহ্লাদ পুণ্যজনি পুণ্যবলাৎপ্রতীতং

রূপং জনস্তবহরে নিগমান্তবেদ্যম্ ।

প্রাতঃস্মরংস্তরতি সংস্মারণাম্বুরাশিং

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ৩১॥

শ্রীসুপ্রভাতমিদমচ্যুতকৈতবোক্ত

মপ্যচ্যুতং ভবতুভক্তজনৈকবেদ্যম্ ।

লক্ষ্মীনৃসিংহ তব নামশুভপ্রভাবাত্

যাদাদ্রিনাথ নৃহরে! তব সুপ্রভাতম্ ॥ ৩২ ॥

ইত্থং যাদাদ্রিনাথস্য সুপ্রভাত মতন্দ্রিতাঃ ।

যে পঠন্তি সদা ভক্ত্যা তে নরাস্সুখভাগিনঃ ॥ ৩৩॥

ইতি শ্রী লক্ষ্মী নরসিংহ সুপ্রভাতম্ ।

Proofread and corrected by

Venkata N Vangeepuram vangeepuram@rediffmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Yadagiri Lakshmi Narasimha Suprabhatam Lyrics in Bengali PDF
% File name : laxminrisimhaSup.itx
% Location : doc_vishhnu
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : http://www.mypurohith.com
% Proofread by : Venkata N Vangeepuram vangeepuram at rediffmail.com Great grandson of the composer
% Latest update : December 15, 2003
% Send corrections to : Sanskrit@cheerful.com

% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website